## चतुर्थ्यर्थे बहुलं छन्दसि । (६२/३३९६)

छन्दसि विषये चतुर्थ्यर्थे षष्ठी विभक्तिर्भवति बहुलम् । 'पुरुषमृगश्चन्द्रमसः[1]' (वा.सं. २४.३५) । 'पुरुषमृगश्चन्द्रमसे[2]' । 'गोधा कालका दार्वाघाटस्ते वनस्पतीनाम् । [3]ते वनस्पतिभ्यः' (वा.सं. २४.३५) । बहुलग्रहणं किम्? '[4]कृष्णो रात्र्यै' (का.सं. ६८.४०) । '[5]हिमवते हस्ती' (वा.सं. २४.३०) ।

[१४२] षष्ठ्यर्थे चतुर्थी वक्तव्या । (म.भा. १.४६६)

'या खर्वेण पिबति तस्यै खर्वो जायते । या दतो धावते तस्यै [6]श्यावदन् । या नखानि निकृन्तते तस्यै [7]कुनखी । [8]याऽङ्क्ते तस्यै काणः । याऽभ्यङ्क्ते तस्यै दुश्चर्मा । या केशान् प्रलिखते तस्यै खलतिः ।' (तै.सं. २.५.१.६) । 'अहल्यायै जारः' (श.ब्रा. ३.३.१.१९) ॥

## यजेश्च करणे । (६३/३३९७)

यजेर्धातोः करणे कारके छन्दसि[9] बहुलं षष्ठी विभक्तिर्भवति । 'घृतस्य यजते' (श.ब्रा. ४.४.२.४), [10]घृतेन यजते । 'सौम्यस्य यजते' (श.ब्रा. ४.४.२.५), [11]सोमेन यजते ॥

## कृत्वोऽर्थप्रयोगे कालेऽधिकरणे । (६४/६२२)

छन्दसि बहुलम् इति निवृत्तम् । कृत्वोऽर्थानां प्रयोगे कालेऽधिकरणे षष्ठी विभक्तिर्भवति । पञ्चकृत्वोऽह्नो भुङ्क्ते । [12]द्विरह्नोऽधीते । [13]कृत्वोऽर्थग्रहणं किम् ? [14]अह्नि शेते । रात्रौ शेते । प्रयोगग्रहणं किम्? अहनि [15]भुक्तम् । गम्यते [16]हि द्विस्त्रिश्चतुर्वेति, न त्वप्रयुज्यमाने भवति । कालग्रहणं किम् ? द्विः कांस्यपात्र्यां भुङ्क्ते । [17]अधिकरणे इति किम् ? [18]द्विरह्नो भुङ्क्ते । शेषे इत्येव, द्विरहन्यधीते ॥

## कर्तृकर्मणोः कृति । (६५/६२३)

[19]कृत्प्रयोगे [20]कर्तरि कर्मणि च[21] षष्ठी विभक्तिर्भवति । भवतः [22]शायिका । भवत आसिका । कर्मणि— अपां स्रष्टा । 'पुरां भेत्ता' (ऋ. ८.१७.१४) । '[23]वज्रस्य [24]भर्ता' (तै.सं. १.४.२८.१) । कर्तृकर्मणोः इति किम् ? [25]शस्त्रेण भेत्ता । कृति इति किम् ? तद्धितप्रयोगे मा भूत्, कृतपूर्वी कटम् । [26]भुक्तपूर्व्योदनम् (म.भा. १.४६७) । शेषे इति निवृत्तम्, पुनः कर्मग्रहणात् । इतरथा हि कर्तरि च कृति [27]इत्येवं ब्रूयात् ॥

---

1. दातव्यः इत्यधिकम् क.ड.ह. 2. दातव्यः इत्यधिकम् ह. 3. ते नास्ति फ. 4. कला ड. 5. हिमवतो हस्ते ग. 6. श्यावकान् ह. 7. कुनखो जायते ड. 8. या–जारः नास्ति ग. 9. विषये इत्यधिकम् क.ड.इ.फ.ह. 10. आग्नेय्या फ. 11. सोम्या फ. 12. त्रिरह्नो ड. 13. कृत्वार्थ° ह. 14. अहनि फ. 15. भुङ्क्ते ड.फ. 16. द्विर्वा त्रिर्वा इति तत्त्वप्रयुज्यमानम् ड. 17. अधिकरणग्रहणं इ. 18. द्विरह्ना ड. 19. कृत्यप्रयोगे फ, कृत्प्रत्यययोगे ड. 20. कर्तृकर्मणोश्च कारकस्य इ. 21. कारके इत्यधिकम् ग, परतः इत्यधिकम् फ. 22. गामिका फ. 23. उदाहरणमिदं नास्ति ड. 24. भेत्ता इ. 25. वज्रेण ड. 26. कृतपूर्व्योदनम् इ.ह. 27. इत्येव ड.ई.